दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-162 | 1 | अप्रैल 04, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णद्वितीया
चैत्र 21 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे न भविष्यन्ति शिक्षकेषु सामान्य-स्थानान्तरणानि, केवलम् आवश्यकेषु विषयेषु एव विचारः भविष्यति

3 आम आदमी पार्टी दलस्य आन्तरिककलहः- राघव चड्ढा उपनेतृपदात् निष्कासितः

4 विश्वपटले भारतीयज्ञानपरम्परायाः अधिकप्रभावि- प्रस्तुतेः सुवर्णावसरः - डॉ. श्रीनिवासजम्मलमडका

## उपलब्धिः-भारतीयनौसेनायां सम्मिलितः 'आई.एन.एस. तारागिरी' युद्धपोतः



भारतीयनौसेनया विशाखापत्तनम-नगरे आधुनिकः 'स्टील्थ फ्रिगेट' युद्धपोतः आई.एन.एस. तारागिरी (INS Taragiri) स्वकीये दले सम्मिलितः कृतः। अस्य निर्माणं मझगांव-डॉक-शिपबिल्डर्स-लिमिटेड इत्यनया संस्थया कृतम् अस्ति। एषः युद्धपोतः प्रोजेक्ट १७-ए श्रेण्याः चतुर्थः पोतः अस्ति। रक्षामन्त्री राजनाथ सिंहः अस्य भव्यसमारोहस्य अध्यक्षतां कृतवान्। अस्मिन् अवसरे श्रीसिंहः अवदत् यत् वर्षं २०४७ पर्यन्तं भारतं विकसितराष्ट्रं कर्तुं समुद्रशक्तिः अतीव महत्त्वपूर्णा अस्ति। भारतस्य प्रायः ११ सहस्रं किलोमीटर् परिमिता दीर्घा समुद्रसीमा अस्ति। भारतं त्रिभिः पक्षैः समुद्रेण आवृतम् अस्ति। भारतस्य ९५ प्रतिशतं व्यापारः समुद्री-मार्गेण एव भवति। ऊर्जासुरक्षा अपि समुद्रस्य उपरि एव आश्रिता अस्ति। अतः सुदृढा नौसेना राष्ट्रस्य कृते अनिवार्या अस्ति।

### नौसेनायाः योगदानम्

रक्षामन्त्रिणा उक्तं यत् नौसेना सङ्कटकाले वाणिज्यिक-विमानानां तैल-टैंकर-यानानां च सुरक्षां कृतवती अस्ति। भारतीयनौसेना हिन्दमहासागरे, 'फारस की खाड़ी' इत्यत्र मलक्का-जलसन्धिः इत्यादिषु प्रमुखक्षेत्रेषु निरन्तरं स्वकीयां उपस्थितिं धारयति। एषा नौसेना साहाय्य-अभियानेषु अपि अग्रणी भवति।

### आई.एन.एस. तारागिरी युद्धपोतस्य वैशिष्ट्यानि

**भारः** - ६,५०० टन् परिमितः।
**तकनीकी** - अत्याधुनिक-स्टील्थ-सुविधाभिः शस्त्रप्रणालीभिः च सज्जः।
**स्वदेशी-अभिमानम्** - अस्मिन् पोते ७५ प्रतिशततः अधिका स्वदेशी-सामग्री प्रयुक्ता अस्ति।
**गरिमामयी उपस्थितिः**
अस्मिन् समारोहे चीफ-ऑफ-डिफेंस-स्टाफ (CDS) जनरल अनिलचौहानः, नौसेनाप्रमुखः एडमिरल दिनेश के. त्रिपाठी, वाइस एडमिरल संजय भल्ला तथा च अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्।

## आदिवासीक्रीडाप्रतिभा अस्माकं राष्ट्रियगौरवम्- राष्ट्रपतिः



राष्ट्रपतिः द्रौपदीमुर्मुः उक्तवती यत् आदिवासीसमुदायेभ्यः आगतानां युवानां क्रीडाप्रतिभा राष्ट्रस्य कृते अमूल्या सामाजिकपूँजी अस्ति। सा 'आदिवासीक्रीडाप्रतिभा अस्माकं राष्ट्रियगौरवम्' इति शीर्षकेण लिखिते स्वकीये लेखे अवदत् यत् 'खेलो इण्डिया ट्राइबल गेम्स २०२६' इत्यनेन या क्रीडागतिः उत्पन्ना, तस्याः निरन्तरं सुदृढीकरणेन तादृशः क्रीडावर्गः सज्जः भविष्यति यः भारतं वैश्विकक्रीडा-महाशक्तिरूपेण प्रतिष्ठापयिष्यति।
राष्ट्रपतिमहोदया स्थानीयस्तरात् राष्ट्रियस्तरपर्यन्तं सर्वेभ्यः भौगोलिकक्षेत्रेभ्यः, सामाजिकवर्गेभ्यः, संस्थाभ्यः च उचितं क्रीडा-पारिस्थितिकी-तन्त्रं (Sports Ecosystem) प्रदातुं 'खेलो इण्डिया' इति उपक्रमस्य भृशं प्रशंसां कृतवती। मया उक्तं तत् आदिवासीयुवकानां कौशलं राष्ट्रस्य अमूल्यसम्पत्तिः अस्ति। भारतं विश्वक्रीडाक्षेत्रे अग्रणीं राष्ट्रं निर्माणम् अस्माकं लक्ष्यं वर्त्तते। एतदर्थं क्रीडाक्षेत्रे सर्वेषां वर्गाणां समावेशनं आवश्यकम् वर्त्तते।

## अश्विनीवैष्णवस्य समीक्षागोष्ठी



रेलमन्त्री अश्विनीवैष्णवः गतदिने नवदिल्ल्यां रेल-अधिकारिभिः सह एकायाः समीक्षागोष्ठ्याः अध्यक्षतां कृतवान्। रेलमन्त्रिणा उक्तं यत् निर्धन-मध्यमवर्गीयेभ्यः जनेभ्यः उत्तमं यात्रा-अनुभवं प्रदातुं भारतीयरेलस्य सर्वोपरि प्राथमिकता अस्ति। सः अधिकारिणः एतस्य लक्ष्यस्य प्राप्त्यर्थं सामूहिकरूपेण कार्यं कर्तुम् आहूतवान्, विगतवर्षस्य प्रशंसनीयप्रदर्शनाय रेलकर्मचारिभ्यः वर्धापनानि च दत्तवान्।

## भारते एल.पी.जी. आपूर्तिः सुव्यवस्थिता

### मिथ्याप्रचारे अनियमितासु च भविष्यति दण्डः

पश्चिम-एशिया-क्षेत्रे चलति सङ्घर्षे सति वैश्विक-ऊर्जा-विपण्यां प्रक्षोभः दृश्यते, किन्तु भारते एल.पी.जी. (LPG) इत्यस्य आपूर्तिः पर्याप्ता अस्ति। इण्डियन ऑयल् (Indian Oil) संस्थया घोषितं यत् सा पाक-अङ्गारवायोः (cooking gas) निर्बाध-आपूर्तिं करोति। सम्प्रति प्रतिदिनं प्रायः २८ लक्षं एल.पी.जी. सिलिण्डर्-पात्राणां वितरणं क्रियमाणं वर्तते। एतत् वितरणं भू-राजनीतिक-तनावस्य आरम्भात् पूर्वस्य सामान्यस्तरस्य अनुरूपमेव अस्ति।
**डिजिटल-माध्यमानां प्रयोगः**-कम्पनी ग्राहकान् एल.पी.जी. रिफिल्-बुकिङ्ग (LPG refill booking) कर्तुं एस.एम.एस. (SMS) तथा आई.वी.आर.एस. (IVRS) सदृशं डिजिटल-माध्यमं प्रयोक्तुं प्रोत्साहितवती। वर्तमानकाले प्रायः ८७ प्रतिशतं बुकिङ्ग् डिजिटल-मञ्चैः एव प्राप्यते।
**अनियमिततासु कठोरपदक्षेपः**- सोशल मीडिया-माध्यमेन तथा ग्राहक-अभियोगैः केषाञ्चित् वितरकाणाम् अनियमिततायाः सूचनाः प्राप्ताः। अतः:
**निरीक्षणम्-:** कृष्णविपणनं (Black marketing) तथा सञ्चयकरणं (Hoarding) रोद्धुं कम्पनी अनेकदलानां नियुक्तिं कृतवती अस्ति।
**कार्याचरणम्-:** अधुना यावत् ७,५०० तः अधिकानां वितरकाणां आकस्मिक-निरीक्षणं कृतम्।
**दण्डः-:** नियमानाम् उल्लङ्घनकारणतः १४१ एल.पी.जी. वितरकाणां विरुद्धं कठोरदण्डात्मिका कार्यवाही कृता अस्ति।
**मुख्यसन्देशः-:** इण्डियन ऑयल् स्पष्टीकृतवती यत् देशे इन्धनस्य अभावः नास्ति, अतः ग्राहकाः चिन्तामुक्ताः भवेयुः।

## सुभाषितम्

**इह भोगं यशः प्रीतिं, सभासु बहुमान्यता।**
**दद्यात्परत्र सुगतिं, विद्याधनमनुत्तमम्।।**

भावार्थः- इस संसार में विद्या रूपी धन ही सर्वश्रेष्ठ है क्योंकि उसके माध्यम से सांसारिक सुख, यश, प्रीति तथा विद्वानों की सभाओं में आदर और मान्यता तो प्राप्त होते ही है, जीवन के अन्य क्षेत्रों में भी सफलता और सुख प्राप्त होता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य एकदिवसीय-भ्रमणाय बिहारराज्यम् आगमिष्यति



उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य एकदिवसीय-भ्रमणाय बिहारराज्यं आगमिष्यति। अस्मिन् अवसरे सः मोतिहारी-नगरे महात्मागान्धी-केन्द्रीयविश्व-विद्यालयस्य तृतीय-दीक्षान्तसमारोहे मुख्यअतिथिरूपेण सम्मिलितः भविष्यति। श्रीराधाकृष्णन् महोदयः पश्चिमचम्पारण-मण्डले भितिहरवा-गान्धी-आश्रममपि गमिष्यति।

# हिमाचलप्रदेशे न भविष्यन्ति शिक्षकेषु सामान्य-स्थानान्तरणानि, केवलम् आवश्यकेषु विषयेषु एव विचारः भविष्यति

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे नूतन-शैक्षणिक-सत्रात् शिक्षकेषु सामान्य-स्थानान्तरणानां निषेधः यथावत् धारयितुं निर्णयः कृतः अस्ति। शिक्षाविभागेन स्पष्टं कृतं यत् अधुना केवलम् अत्यावश्यक-प्रकरणेषु एव स्थानान्तरणेषु विचारः क्रियते, येन विद्यालयेषु शैक्षणिकव्यवस्था न प्रभाविता भवेत्, विद्यार्थिनां अध्ययनं च सुचारुरूपेण प्रवर्तेत। अस्य निर्णयस्य मुख्यं कारणं प्रदेशस्य १५५ सीबीएसई विद्यालयेषु अस्मिन् मासे भविष्यन्त्यः नूतन-नियुक्तयः सन्ति। एतेषु विद्यालयेषु शिक्षकेषु नियुक्तिः परीक्षामार्गेण क्रियते, येन व्यापक-स्थानान्तरण-स्थिति उत्पद्यते। अतः विभागेन सामान्य-स्थानान्तरणानां निषेधं कृत्वा स्थितेः नियन्त्रणं कर्तुं निर्णयः कृतः अस्ति।

## सीबीएसई विद्यालयेषु परीक्षाया वरीयता-आधारेण शिक्षकेषां नियुक्तिः भविष्यति

सीबीएसई पाठ्यक्रमयुक्तेषु विद्यालयेषु शिक्षकेषां नियुक्तिः परीक्षाया मेरिट-आधारेण भविष्यति। अनेन एतेषु विद्यालयेषु वर्तमान-कर्मचारिषु व्यापकः परिवर्तनः दृश्यते। नूतन-चयन-प्रक्रिया प्रवर्तिते सति बहवः शिक्षकाः अन्येषु स्थानेषु प्रेषिताः भविष्यन्ति, यदा योग्याः शिक्षकाः एतेषु विद्यालयेषु नियुक्तिं प्राप्स्यन्ति। शिक्षामन्त्री रोहित ठाकुरः अवदत् यत् सत्रस्य आरम्भे विशाल- परिमाणेन स्थानान्तरणं विद्यालयानां व्यवस्थां विक्षिप्तुं शक्नोति। अतः एतत् दृष्ट्वा सामान्य-स्थानान्तरणानि अद्य न उद्घाटितानि भविष्यन्ति। यत्र अत्यधिक-आवश्यकता भविष्यति, तत्र एव स्थानान्तरणानि क्रियन्ते।



## ३१ मार्चे प्रदेशे ६५० शिक्षकाः सेवानिवृत्ताः अभवन्

३१ मार्चे सम्पूर्ण-प्रदेशे प्रायः ६५० शिक्षकाः सेवानिवृत्ताः अभवन्, येन अनेकविद्यालयेषु शिक्षकेषां न्यूनता उत्पन्ना जाता। अतः नूतन- नियुक्तिभिः सीमित-स्थानान्तरणैश्च एषा न्यूनता पूर्तुं योजना क्रियते।

## सेवानिवृत्तेः पूर्वसूचना अनिवार्या

शिक्षाविभागेन स्पष्टं कृतं यत् शिक्षकैः शैक्षणिकसत्रे २०२६-२७ मध्ये सेवानिवृत्तिं ग्रहीतुं इच्छन्ति चेत् पूर्वसूचना दातुम् अनिवार्या। अनेन विभागाय समये एव वैकल्पिकव्यवस्था कर्तुं साहाय्यं भविष्यति, छात्राणां अध्ययनं न प्रभावितं भविष्यति। ये शिक्षकाः सेवानिवृत्तेः सूचनां न दास्यन्ति, तेषां सेवाः ३१ मार्च २०२७ पर्यन्तं प्रवर्तिष्यन्ते।

# हिमाचल- प्रधानमन्त्री आवास योजना: कथं भवेत् आवेदनम्? का अस्ति पात्रता? कथं लप्स्यते लाभ:?




**हिमसंस्कृतवार्ताः- शिमला।**
केन्द्रसर्वकारेण नगरीयक्षेत्रेषु सर्वेभ्यः आवासं प्रदातुम् उद्देशेन 'प्रधानमन्त्री आवास योजना-शहरी २.०' प्रारब्धा। एषा योजना २०२४ तमे वर्षे सितम्बरमासस्य प्रथमदिनाङ्कात् आगामिपञ्चवर्षाणि यावत् प्रवर्तते। अस्याः योजनायाः अन्तर्गतं गृहनिर्माणार्थं केन्द्रसर्वकारेण २.२५ लक्षं रूप्यकाणि तथा राज्यसर्वकारेण २५ सहस्रं रूप्यकाणि सहायताधराशिः प्रदीयते।

## कथं करणीयम् आवेदनम्?

योजनायै आवेदनं कर्तुमिच्छुकाः जनाः 'पीएमएवाई- यू' (PMAY-U) इत्यस्य अधिकृत- जालपुटे (Website) गत्वा अन्तर्जालमाध्यमेन आवेदनं कर्तुं शक्नुवन्ति। एतदतिरिच्य इच्छुकजनाः नगरनिकायस्य कार्यलये अपि आवेदनं कर्तुं शक्नुवन्ति। सर्वकारस्य लक्ष्यमस्ति यत् अस्याः योजनायाः माध्यमेन नगरीयक्षेत्रेषु निवसन्तः निर्धनाः मध्यमवर्गीयाः च जनाः अल्पमूल्ये उत्तम-आवाससुविधां प्राप्नुयुः। अस्याः अन्तर्गतं पात्रलाभार्थिभ्यः गृहनिर्माणार्थं, क्रयणार्थं वा भाटकेन स्वीकरणार्थं च आर्थिकसहायता दास्यते, येन ते न्यूनदरेण स्वकीयं गृहं प्राप्तुं शक्नुवन्ति।

**कः आवेदनं कर्तुं शक्नोति?**

योजनायाः लाभः आर्थिकरूपेण दुर्बलवर्गाय (EWS), निम्न-आयवर्गाय (LIG) तथा मध्यम- आयवर्गाय (MIG) च लप्स्यते। पात्राणि तानि एव कुटुम्बानि भविष्यन्ति येषां समीपे देशे कुत्रापि दृढं ('पक्का') गृहं नास्ति। कुटुम्बे पति-पत्नी तथा अविवाहिताः पुत्राः पुत्र्यः च सम्मिलिताः भविष्यन्ति। योजनायाः अन्तर्गतं न्यूनतम् ३० वर्गमीटर- परिमितं गृहं निर्मीयते, यस्मिन् जलं, विद्युत्, मार्गः, स्वच्छता सदृशाः मूलभूतसुविधाः अनिवार्याः भविष्यन्ति।

## राज्येभ्यः का अस्ति शिथिलता?

राज्येभ्यः गृहस्य आकारं ४५ वर्गमीटर-परिमितं यावत् वर्धयितुं अनुमतिः प्रदत्ता। सहैव परियोजनासु दिव्यांगजनेभ्यः सोपानमार्गः (Ramp), आंगनबाड़ी-केन्द्रं, वर्षानिधि-सञ्चयनं (Rainwater harvesting) सौर-ऊर्जा सदृशाः सुविधाः अपि सुनिश्चिताः भविष्यन्ति। एषा योजना चतुर्षु मुख्यभागेषु प्रयोक्ष्यते। प्रथमं, 'लाभार्थी- आधारित- निर्माणम्' (BLC) इत्यस्य अन्तर्गतं निर्धनाः जनाः स्वभूमौ गृहं निर्मातुं शक्ष्यन्ति तथा किस्तेषु (Installments) सहायतां प्राप्स्यन्ति। द्वितीयं, 'सहभागिता-इत्यत्र किफायती-आवास' (AHP) इत्यस्य अन्तर्गतं निजी- सर्वकारीय- परियोजनासु अल्पमूल्ये गृहाणि उपलब्धानि भविष्यन्ति। तृतीयं, न्यूनशुल्क-आवास' (ARHC) इत्यस्य अन्तर्गतं नगरीय-निर्धनेभ्यः कर्मचारिभ्यः च भाटकगृहाणि उपलभ्यन्ते। चतुर्थं, 'ब्याज- अपकर्ष- योजना' (CLSS) इत्यस्य अन्तर्गतं गृहक्रयणार्थं स्वीकृतऋणे (Loan) व्याज-अनुदानं दास्यते।

## का अस्ति वार्षिकी आय-सीमा?

आय-सीमायाम् ईडब्लयूएस (EWS) वर्गस्य वार्षिकी आयः ३ लक्षं रूप्यकाणि यावत्, एलआईजी (LIG) वर्गस्य ३ तः ६ लक्षं यावत् तथा एमआईजी (MIG) वर्गस्य ६ तः ९ लक्षं रूप्यकाणि यावत् निर्दिष्टा अस्ति।

# टाण्डा-चिकित्सा-महाविद्यालय-शिक्षक-कल्याण-सङ्घेन (टेमकोट) नवनियुक्त-शिक्षकाणां कृते 'एक-समान-कैडर' प्रणाल्याः कृतः विरोधः



**हिमसंस्कृतवार्ताः- काङ्गड़ा (टाण्डा)।**

हिमसंस्कृतवार्ताः - काङ्गड़ा ।
टाण्डा-चिकित्सा-महाविद्यालय-शिक्षक-सङ्घेन (टेमकोट) हिमाचलप्रदेशसर्वकारेण सद्यः निर्गतायाः तस्याः अधिसूचनायाः तीव्रः विरोधः कृतः, यस्यां राज्यस्य सर्वेषु षट् (६) सर्वकारीय-चिकित्सा-महाविद्यालयेषु नवनियुक्त-शिक्षकाणां कृते 'एक-समान-संवर्गः' (Uniform Cadre) इति प्रणाली-निर्माणस्य प्रस्तावः अस्ति। 'टेमकोट' इति सङ्घस्य मान्यता अस्ति यत् नूतन-नियुक्तीनां कृते एक-समान-कैडर-नियमस्य प्रयोगेण हिमाचलप्रदेशस्य चिकित्सा-महाविद्यालयानां संरचनायां कार्यप्रणाल्यां च दीर्घकालं यावत् गम्भीराः प्रभावाः भविष्यन्ति।

## विशिष्ट-अभिज्ञानस्य वरिष्ठतायाः च सङ्कटम्

सङ्घानुसारं इयं नीतिः शनैः शनैः संस्थानस्य विशिष्टां परिचयम्, स्थिरतां, शैक्षणिक-संस्कृतिं च दुर्बलां करिष्यति। अन्तर-महाविद्यालय-स्थानान्तरणेन (Inter-college transfer) विधिक-जटिलताः अपि उत्पन्नाः भविष्यन्ति, यतः अनेन आचार्य-सदस्यानां मध्ये 'वरिष्ठता' (Seniority) सम्बद्धाः विवादाः उद्भविष्यन्ति। पूर्ण-सम्भावना अस्ति यत् शिक्षकाः एतेषां वरिष्ठता-विषयाणां समाधानाय न्यायिक-हस्तक्षेपस्य (Court cases) अभ्यर्थनां करिष्यन्ति, येन समयस्य संसाधनानां च विनाशः भविष्यति। प्रत्येकं चिकित्सा-महाविद्यालयः एकस्यां अद्वितीय-नैदानिक-शैक्षणिक-पारिस्थितिक्यां (Ecosystem) कार्यं करोति।

## संशोधन-बाधा तथा छात्राणां हानिः

केन्द्रीकृत-प्रणाल्या वारं वारं स्थानान्तरणं भवितुं शक्नोति, येन संस्थानं प्रति अनुरागः न्यूनः भविष्यति तथा शिक्षण-रोगी-सेवा-संशोधन-कार्याणां निरन्तरता बाधिता भविष्यति। शिक्षकेषु निरन्तर-परिवर्तनेन पाठ्यक्रमस्य प्रवाहः त्रुटिष्यति, छात्रेभ्यः च नूतन-शिक्षण-शैलीभिः सह सन्तुलनं स्थापयितुं कष्टं भविष्यति स्नातक-स्नातकोत्तर-छात्राः तस्मात् दीर्घकालिक-मार्गदर्शनात् (Mentorship) वञ्चिताः भविष्यन्ति, यत् चिकित्सा-प्रशिक्षणायाय अनिवार्यम् अस्ति। शोध-परियोजनासु शोध-पत्रेषु च तेषां शिक्षकाणां स्थानान्तरणेन बाधा भविष्यति ये तस्य नेतृत्वं कुर्वन्तः सन्ति। सतत-स्थानान्तरणेन कर्मचारिणां मनोबलं त्रुट्यति, मानसिक-अवसादः वर्धते तथा श्रांतः (Fatigue) भवति, यस्य नकारात्मकः प्रभावः तेषां कार्य-प्रदर्शने (Performance) दृश्यते।

# सङ्घटनस्य सुदृढीकरणाय सदस्यता- अभियानस्य तीव्रता आवश्यकी- प्रतिभासिंहः



**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशकाङ्ग्रेसनेत्री पूर्वसांसद च प्रतिभासिंह- महोदया नवनियुक्तान् पीसीसी-पदाधिकारिणः सदस्यता- अभियानं तीव्रं कर्तुं समाहूतवती। सा अवदत् यत् सङ्घटनस्य शक्त्यै सर्वैः 'एकत्र' भूत्वा कार्यं करणीयम्, कार्यकर्तॄणां मान-सम्मानस्य रक्षणं च पदाधिकारिणां प्राथमिकं दायित्वं वर्तते। 'होली लॉज' मध्ये आयोजितायां गोष्ठ्यां सा उक्तवती यत् प्रदेशे काङ्ग्रेस-सर्वकारः कार्यकर्तॄणां परिश्रमेण एव निर्मितः, अतः तेषां मनोबलवर्धनं अतीव आवश्यकम्। सा आगामि- पञ्चायत- विधानसभा-निर्वाचनाय इदानीमेव सज्जतां कर्तुं, सर्वकारस्य उपलब्धयः जनं जनं प्रति नेतुं आह्वानं कृतवती। वीरभद्रसिंहस्य योगदानं स्मरन्ती सा उक्तवती यत् सङ्घटनं सुदृढं करणं सर्वेषां दायित्वं वर्तते।

## अनुशासनहीनतायां 'नो टॉलरेन्स' इति नीतिः भविष्यति- कुलदीपराठौरः

अपरतः प्रदेश-काङ्ग्रेस-अनुशासन-समित्याः अध्यक्षः कुलदीपसिंहराठौरः स्पष्टीकृतवान् यत् सङ्घटनस्य आधारः 'अनुशासनम्' एव अस्ति। शुक्रवासरे पत्रकारैः सह वार्तालापं कुर्वन् राठौरः उक्तवान् यत् सः कस्यापि प्रभावतले कार्यं न करोति, सर्वे निर्णयाः 'पार्टी-संविधान' अनुरूपं भविष्यन्ति। यदि कश्चन विधायकः, पदाधिकारी वा सङ्घटनात्मककार्येषु अनावश्यक-हस्तक्षेपं करोति, तर्हि सा 'अनुशासनहीनता' मन्यिष्यते। दलीयमञ्चात् बहिः व्यक्तिगतमतं सार्वजनिकं करणं न सोढव्यम्। अनुशासनभङ्गे कठोरकार्यविधिः भविष्यति। शीघ्रमेव अनुशासन-समित्याः गोष्ठी आहूय स्पष्टाः निर्देशाः दास्यन्ते।

## इण्डियन प्रीमियर लीग (IPL) इत्यस्य सप्तमे स्पर्धायाम् पञ्जाब किंग्स दलेन चेन्नई सुपर किंग्स दलं ५ क्रीडककैः (wickets) पराजितम्

पञ्जाब किंग्स दलेन नाणक-विजयं प्राप्य प्रथमं क्षेत्ररक्षणं (Bowling) चितम्।चेन्नई सुपर किंग्स दलेन प्रथमं फलकक्रीडां कुर्वता निर्धारित २० षट्केषु (overs) ५ क्रीडककान् गमायित्वा २०९ धावनाङ्काः अर्जिताः।आयुष म्हात्रेः ४३ कन्दुकानां सामनां कृत्वा सर्वाधिकं ७३ धावनाङ्काः प्राप्तवान्।शिवम दुबेः २७ कन्दुकैः ४५ धावनाङ्कान् (अविजितः) अकरोत्।सरफराज खानः १२ कन्दुकैः द्रुतगत्या ३२ धावनाङ्काः अर्जिताः।

पञ्जाब-दलस्य लक्ष्य-प्राप्तिः (Chase)-पञ्जाब किंग्स दलेन १८.४ षट्केषु ५ क्रीडककान् गमायित्वा २१० धावनाङ्काः कृत्वा विजयः प्राप्तः। श्रेयस अय्यरः दलस्य नायकः (Captain) २९ कन्दुकैः ५० धावनाङ्कान् अकरोत्।

प्रियांश आर्यः केवलं ११ कन्दुकैः ३९ धावनाङ्कान् (३ चतुष्काः, ४ षट्काः) अकरोत्, येन दलस्य आरम्भः अतीव प्रभावशाली अभवत्।प्रभसिमरन सिंहः सः अपि ३४ कन्दुकैः ४३ धावनाङ्कानां योगदानं दत्तवान्।

## अमरीका-ईरान-इजरायल युद्धम्-: आईआरजीसी-पक्षतः अमरीकी-विमानस्य पतनस्य पुष्टिः



**हिमसंस्कृतवार्ताः।** अमरीका-इजरायल-ईरान-देशानां मध्ये प्रचलतः युद्धस्य पञ्चत्रिंशत्तमे (३५) दिवसे ईरान-देशस्य 'इस्लामिक रिवोल्यूशनरी गार्ड कॉर्प्स' (आईआरजीसी) इत्यनेन कश्चन विशाला पुष्टिः कृतः। आईआरजीसी-अनुसारं तैः अमरीकादेशस्य उन्नत-लड़ाकू-विमानं एफ-15ई (F-15E) अवनतम् (मारयित्वा पातितम्) अस्ति। अपि च तैः तस्य विमानस्य भग्नखण्डानां चित्राणि अपि प्रसारितानि। आईआरजीसी-पक्षतः उक्तं यत् फारस-खातस्य केश्म-द्वीपस्य दक्षिणभागे एषा घटना घटिता, यत्र ईरानस्य वायु-रक्षा-प्रणाल्या (Air Defense System) अमरीकी-विमानं विध्वस्तं कृतम्। ईरानी-माध्यमानां सूचनानुसारं नष्टविमानस्य चालकः (पायलट) बहिः कूर्दितवान्, यः ईरान-सुरक्षाबलैः ग्रहीतः। तस्नीम-वार्तासंस्थायाः अनुसारं, अमरीकी-सेनया स्वचालकस्य रक्षणार्थं 'ब्लैक हॉक' हेलिकॉप्टर्-विमानानां तथा 'सी-130 हरक्यूलिस' विमानस्य उपयोगेन अन्वेषण-अभियानं चालितं, परन्तु तत् विफलम् अभवत्। यद्यपि ईरान-देशेन आधिकारिकरूपेण चालकस्य बन्दिभावस्य पुष्टिः न कृता, परन्तु तेन चालकस्य सूचनादात्रे पुरस्कारस्य घोषणा कृता अस्ति। अपरपक्षे, अमरीका-देशेन एतेषां तथ्यानां पुष्टिः मिथ्या इति उक्ताः।

**इजरायलस्य प्रत्युत्तरं रणनीतिक-प्रहारश्च**

शुक्रवासरे इजरायल-अमरीका-देशाभ्यां मिलित्वा ईरानस्य केश्म-पत्तनस्य (Port) उपरि भीषणः आक्रमणः कृतः। उपग्रहचित्रेषु केश्म-बन्दरगाहतः धूम्रराशिः उद्गच्छन् दृष्टः। ईरानस्य कृते एतत् पत्तनं रणनीतिक-आर्थिकदृष्ट्या अत्यन्तं महत्त्वपूर्णम् अस्ति, यतः 'होर्मुज-जलसन्धि' (Strait of Hormuz) इत्यत्र नियन्त्रणार्थम् अस्य द्वीपस्य महती भूमिका वर्तते। केश्म-फ्री-जोन अधिकारिणाम् अनुसारं 'बहमन' वाणिज्यिक-पत्तनस्य मत्स्यपालन-घाटस्य च क्षतिः अभवत्।

**ईरानस्य मिसाइल-आक्रमणम्**

प्रतिशोधस्वरूपेण ईरानेन इजरायलस्य उच्च-तकनीकी-रक्षाकेन्द्रे सटीकं बैलिस्टिक-मिसाइल-आक्रमणं कृतम्। ईरानस्य लक्ष्यं पेताह टिकवा नगरे स्थिता 'एयरोसोल' ड्रोन-निर्माणशाला (Drone Factory) आसीत्। मिसाइल-प्रहारेण निर्माणशालायाः महती क्षतिः अभवत्, येन ड्रोन-निर्माणकार्यं स्थगितम्। एते ड्रोन्-विमानानि इजरायली-सेनायाः (IDF) 'नेत्रं श्रोत्रं च' इति मन्यन्ते।

# आम आदमी पार्टी दलस्य आन्तरिककलहः- राघव चड्ढा उपनेतृपदात् निष्कासितः



नवदेहलीः। आम आदमी पार्टी (आप) इत्यनेन राज्यसभायाः सचिवालयं प्रति पत्रं लिखिला राघव चड्ढा महोदयः उच्चसदने दलस्य उपनेतृपदात् (Deputy Leader) निष्कासितः। तस्य स्थाने अधुना पञ्जाबराज्यस्य राज्यसभासांसदः अशोकमित्तलः एतत् उत्तरदायित्वं निर्वक्ष्यति।

**भाषणसमये प्रतिबन्धस्य अनुरोधः**-वृत्तानुसारं, दलेन राज्यसभा सचिवालयं प्रति एषः अपि अनुरोधः कृतः यत् राघव चड्ढा महोदयाय दलस्य निश्चितसमयावधौ (Party Quota) भाषणस्य अनुमतिः न प्रदातव्या। राजनैतिकक्षेत्रे एषः निर्णयः अतीव विचित्रः मन्यते, यतः राघव चड्ढा एतावत्पर्यन्तं संसदः मुखरतमः वक्ता आसीत्।

**पदच्युतेः सम्भावितकारणानि-**

यद्यपि दलेन एतत् 'सामान्यं संगठनात्मकं परिवर्तनम्' इति घोषितं, तथापि राजनैतिकविश्लेषकाः अन्यानि कारणानि सूचयन्तिः

**दलस्य विचारधारायाः दूरीकरणम्-:** राघव चड्ढा विगतकिञ्चित्कालात् दलस्य मुख्यविषयेषु (यथा मद्यनीतिप्रकरणम्) मौनम् आचरति स्म। अरविन्द केजरीवाल-मनीष सिसोदिया महोदययोः कारागारात् मुक्तौ सत्यामपि तेन किमपि सार्वजनिकं अभिनन्दनं न कृतम्।

**व्यक्तिगतप्रसिद्धेः आरोपः-:** सूत्राणाम् अनुसारं, दलम् अनेन रुष्टम् आसीत् यत् राघवः संसदि दलस्य नीतीनां स्थाने वैयक्तिकप्रतिष्ठावर्धकान् विषयान् (यथा १० रूप्यकाणां चायकं, पितृत्व-अवकाशः च) उत्थापयति स्म।

महत्त्वपूर्णप्रस्तावेषु अनुपस्थितिः: तस्य उपरि आरोपः अस्ति यत् सः विपक्षस्य कतिपयेषु प्रस्तावेषु (यथा निर्वाचनायोगस्य विरुद्धं महाभियोगः) हस्ताक्षरं कर्तुं निराकृतवान्।

**राघव चड्ढा महोदयस्य प्रतिक्रिया**

पदच्युतेः अनन्तरं राघव चड्ढा महोदेन 'X' (ट्विटर) इति माध्यमेन एकं चलच्चित्रं (Video) प्रसारितम्, यस्मिन् तेन संसदि उत्थापितानां जनहितविषयाणां संग्रहः अस्ति। तेन सह 'नजरबट्टू' (Evil Eye) इति संकेतं प्रयुज्य सः उक्तवान् यत्-:

"अहं मौनीकृतः अस्मि, परन्तु पराजितः न।"

## हास-परिहासम्

**पतिः-** एकस्मिन् अनुसंधाने - एकं शोधम् अस्ति यत् एकस्मिन् दिवसे यत्र एका महिला त्रिंशत् सहस्रः शब्दाः वदति तत्र एकः पुरुषः केवलं पञ्चदश सहस्रः शब्दाः वदति।

🙎‍♂️🧏‍♀️**पत्नी :** सम्यक् तु अस्ति - एतत् अनुसंधानं सिद्धं करोति यत् पुरुषः कदापि एकवारं वार्तां न श्रृणोति, अतः महिलया एका एव वार्ता द्विवारं वक्तव्या भवति। 😅🤣पतिः : 😖😖😖😖😖

हिमसंस्कृतवार्ताः, डॉ.विदुषीअग्रवालः

# विश्वपटले भारतीयज्ञानपरम्परायाः अधिकप्रभावि-प्रस्तुतेः सुवर्णावसरः - डॉ. श्रीनिवासजम्मलमडका



## कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये 'डॉ. के. आर. जोशी व्याख्यानमाला' सम्पन्ना

हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, रामटेकम्।
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य (रामटेक) 'शास्त्रविद्यागुरुकुलम्' इत्यस्य तत्त्वावधाने 'डॉ. के. आर. जोशी व्याख्यानमाला' गुरुवासरे, २ एप्रिल २०२६ दिनाङ्के 'प्रज्ञाभारती श्री भा. वर्णेकर' सभागारे आयोजिता। अस्याः व्याख्यानमालायाः अध्यक्षता माननीयेन कुलगुरुणा डॉ. अतुलवैद्य-महोदयेन कृता। मुख्यवक्तृत्वेन संस्कृतविद् डॉ. श्रीनिवासजम्मलमडका उपस्थितः आसीत्। मञ्चे शास्त्रविद्यागुरुकुलस्य सञ्चालकः प्रो. हरेकृष्णअगस्ती तथा व्याख्यानमालायाः संयोजकः डॉ. राघवेन्द्रभट्टः च विशिष्टरूपेण उपस्थिताः आसन्।

### भारतीयज्ञानपरम्परायाः वैश्विकं भविष्यम्

प्रख्यातन्यायविद् डॉ. श्रीनिवासजम्मलमडका महोदयः "वैश्विकभविष्याय भारतीयज्ञानपरम्परा" इति विषये विद्वत्तापूर्णं व्याख्यानं दत्तवान्। सत्यकामजाबालस्य कथायाः उदाहरणेन तेन प्रतिपादितं यत् उपनिषदां कथानां तथ्येषु परिवर्तनं कृत्वा विश्वस्तरे भारतीयज्ञानपरम्परायाः अशुद्धा सूचना प्रसारिता क्रियते। वर्तमानवैश्विकपरिप्रेक्ष्ये भारतीयज्ञानपरम्परायाः अधिकप्रभाविप्रस्तुतेः अयं 'सुवर्णावसरः' अस्ति। पाश्चात्यविदुषां विचाराणां तर्कपूर्णप्रतिवादाय अस्माकं ग्रन्थानां प्रमाणं, तार्किकदृष्टिः, यथार्थज्ञानं च आवश्यकमम्।
अद्यतनैः छात्रैः वैश्विकविचारधाराणां पृष्ठभूमिश्च अवगन्तव्या, येन तेषां दृष्टिः परिपक्वा, स्पष्टा, विवेकपूर्णा च भविष्यति।

### एआई (AI) तथा चैटजीपीटी (ChatGPT) इत्यनयोः आह्वानम्

कुलगुरुः डॉ. अतुलवैद्यः अध्यक्षीयभाषणे उक्तवान् यत् अस्माकं संस्कृतेः ज्ञानपरम्परायाः च विषये प्रामाणिकसूचनाः विश्वस्तरे उपलब्धीकरणं महदाह्वानम् वर्तते।
कृत्रिमप्रज्ञा (AI) तथा 'चैटजीपीटी' सदृशमाध्यमेषु अस्माकं ग्रन्थानां भ्रष्टाः अर्थाः अनुचितरूपेण प्रसारिताः भवन्ति।
अतः संस्कृतविद्भिः, छात्रैः, विश्वविद्यालयैः च स्वयं प्रारम्भ; (Inauguration) कृत्वा भारतीयज्ञानपरम्परायाः यथार्थज्ञानं अन्तर्जाले (Internet) दातव्यम्। एआई-माध्यमेन प्रसारितानां नकारात्मकविचाराणां समाधानं सकारात्मकदृष्टिकोणेन एव सम्भवति।

**कार्यक्रमविवरणम्** -कार्यक्रमास्य आरम्भः वेदमन्त्रोच्चारणेन सह दीपप्रज्वलनेन अभवत्। प्रास्ताविकं प्रो. हरेकृष्णअगस्ती महोदयेन प्रस्तुतम्। कार्यक्रमस्य सञ्चालनं डॉ. सचिनद्विवेदी महोदयेन कृतं तथा च डॉ. राघवेन्द्रभट्टेन आभारः प्रकटितः। अस्मिन् आयोजने बहुसङ्ख्याकाः छात्राः, शोधकर्तारः, प्राध्यापकाः च उपस्थिताः आसन्।

# म.म.यो.वैदिकविश्वविद्यालये ज्ञानीनाम् अग्रगण्यस्य हनुमतः प्राकट्योत्सवः सश्रद्धं परिपालितः



हिमसंस्कृतवार्ताः। महर्षि-महेशयोगी-वैदिकविश्वविद्यालये, ब्रह्मस्थान-करौन्दी, कटनी,(मध्यप्रदेशे), तमे 02/04/2026 दिनाङ्के , गुरुवासरे, प्रातः 8 वादनात् आरभ्य, आदरणीय-कुलगुरोः प्रो. प्रमोदकुमारवर्मामहोदयस्य संरक्षणे मार्गदर्शने च, श्रीहनुमतः प्राकट्योत्सवस्य पावनः कार्यक्रमः अत्यन्तं श्रद्धाभक्त्युत्साहैः सह सफलतया सम्पन्नः। विश्वविद्यालयस्य समस्तसंकटानां निवारणार्थं सार्वाङ्गीणोन्नतेः मंगलकामनया, वैश्विकशान्त्याः प्रार्थनया च वेदविभागस्य सहायकप्राध्यापकस्य श्रीधनीरामत्रिपाठीमहोदयस्य पौरोहित्ये, डॉ. के. के. त्रिपाठीमहोदयेन विधिवत् वैदिकमन्त्रौच्चारणेन सह श्रीहनुमतः पूजाऽर्चना हवनं च सम्यक् सम्पन्नम्। कार्यक्रमस्य शुभारम्भः भगवान् श्रीहनुमतः विधिवत् पूजाऽर्चनया अभवत्, यस्मिन् वैदिकमन्त्रौच्चारणेन सह श्रद्धाभक्तिमयं वातावरणं निर्मितम्। ततः अनन्तरं उपस्थितैः सर्वैः प्राध्यापकवर्गैः, शैक्षणिक-अशैक्षणिक-कर्मचारिभिः तथा छात्र-छात्राभिः च सामूहिकरूपेण धार्मिकपाठः सम्पन्नः, यस्मिन् "श्रीरामरक्षास्तोत्रम्" एकवारं, "हनुमानचालीसा" एकादशवारं, "बजरङ्गबाणः" एकवारं तथा "एकमुखीहनुमत्कवचम्" एकवारं श्रद्धया पठितम्। तत्पश्चात् समस्तकार्यक्रमस्य समापनं वैदिकविधिना हवनकर्मणा सह अभवत्, यस्मिन् सर्वैः आहुतयः समर्पिताः, तथा च भगवन्तं श्रीहनुमन्तं प्रति विश्वविद्यालयस्य उन्नतिः, सुख-समृद्धिः, समस्तविघ्ननिवारणं च सम्प्रार्थ्य लोककल्याणकारीं पताकां स्थापितवन्तः। अस्य कार्यक्रमस्य संयोजनं वेदविभागाध्यक्षेण डॉ. आलोकचन्द्रपरिडामहोदयेन कृतम्। कार्यक्रमे विश्वविद्यालयस्य प्राध्यापकाः, शोधार्थिनः तथा छात्र-छात्राश्च श्रद्धया सहभागितां कृत्वा सामूहिकरूपेण भक्तिभावेन पाठे हवनकर्मणि च सहभागं कृतवन्तः। हनुमच्चालीसापाठेन सम्पूर्णं वातावरणं भक्त्या, श्रद्धया सकारात्मक-ऊर्जया च परिपूर्णम् अभवत्। अन्ते शान्तिपाठेन सह समस्तविश्वस्य कल्याणं, विश्वविद्यालयस्य उन्नतिः तथा सर्वेषां सुखसमृद्धिः च प्रार्थना कृता।

## "लौकिकन्यायकोशः" "शल्यकवानाखुन्यायः"

तीक्ष्णदन्तः आखुः (उन्दीरः) कस्यचित् सुप्तस्य मनुष्यस्य पादस्य मृदुतलभागम् अत्यन्तकौशल्येन पृथक्करोति यत् सः मनुष्यः वेदनाम् अपि न जानीयात्। एवं कुशलपूर्वकं कार्यं यः करोति तस्य विषये अस्य प्रवृत्तिः भवति। यथा-
राजा प्रजाः अपीडयित्वा ताभ्यः करं संगृह्णीयात् इति।
{महाभारते शान्तिपर्वणः टीकायाम् ८८.६}
डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्तासंवादः

**नन्दिनी**- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। त्वया श्रुतं किम्? आफ्रिका-देशे लघुभिः मीनैः उन्नतः जलप्रपातः आरूढः। पञ्चाशत्-पाद-परिमितः जलप्रपातः तैः विना कष्टं प्राप्तः।
**काव्या**- अहो आश्चर्यम्! एतत् तु अतीव रोचकम्। मीनानां शक्तिः अपूर्वा एव। अन्या वार्ता मया पठिता। एकया महिलया उक्तम् यत् तस्याः कार्यालयस्य वायुना तस्याः त्वक् केशाः च दूषिताः। सा खिन्नतां प्राप्तवती अस्ति। "अहं पूर्ववत् न भवामि" इति तया निवेदितम्।
**नन्दिनी**- सत्यम्, नगरेषु वायुमालिन्यं सर्वत्र दृश्यते, तस्मात् कार्यालयस्य वायुः अपि हानिकारकः भवितुम् अर्हति। मया अपि एका नूतना वार्ता दृष्टा। एकेन दृष्टिहीनेन धावकेन कृत्रिम-प्रज्ञया युक्तं उपनेत्रम् धृतम्। तेन सः प्रथमायां महा-धावन-प्रतियोगितायां भागं गृहीतवान् अस्ति। तत् उपनेत्रं साहाय्यार्थं निर्मितम्।
**काव्या**- यन्त्रज्ञानस्य विकासः खलु अतीव उत्तमः! दृष्टिहीनेभ्यः एतत् महदानुकूल्यम्। मया एका भावपूर्णा वार्ता ज्ञाता। एकेन पुत्रेण स्वमातुः कृते लक्ष-रुप्यकाणां मूल्यस्य उपहारः क्रीतः। परन्तु मात्रा सः उपहारः शीघ्रं न स्वीकृतः। उपहारं स्वीकर्तुम् सा अर्द्ध-घण्टां यावत् तेन प्रार्थिता। अन्ते सा अङ्गीकृतवती अस्ति।
**नन्दिनी**- मातुः स्नेहः तादृशः एव भवति! सा धनं न इच्छति, केवलं प्रेम इच्छति। अद्यतनीयः कार्यक्रमः अत्रैव समाप्तः। धन्यवादाः।